श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गोविन्दराजप्रपत्तिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गोविन्दराजप्रपत्तिः ॥

यश्चैकशैलनिकटे कमलापुरीश -
गोविन्दराजपदयोरकरोत् प्रपत्तिम्।
तं वादिभीकरगुरोश्चरणं प्रपद्ये
पात्रं गुरुं वरवरं परमं गुरूणाम् ॥ 1 ॥

श्रीमन् निदान जगतां निखिलाण्डजात -
निर्वाहशक्तिमुखदिव्यगुणैकतान।
अत्यन्तभोग्यनतदोष निरस्तदोष
गोविन्दराज चरणौ शरणं प्रपद्ये ॥ 2 ॥

रेखारथाङ्गसरसीरुहवज्रशङ्ख -
च्छत्राङ्कुशप्रभृतिमङ्गलचिह्नगर्भौ।
संसारतापहरणे निपुणौ नतानां
गोविन्दराज चरणौ शरणं प्रपद्ये ॥ 3 ॥

पश्यत्सु सान्द्रभयकौतुकमर्भकेषु
प्रौढेषु सत्सु कृतकृत्यपरायणेषु।
विध्वंसितोर्ध्वशकटावपि बालभावे
गोविन्दराज चरणौ शरणं प्रपद्ये ॥ 4 ॥

आलम्ब्य बाहुयुगलेन कुमारभावे
गाढं कराङ्गुलियुगं किल नन्दपत्न्याः।
अभ्यस्यमानदशचङ्क्रमणाभिरामौ
गोविन्दराज चरणौ शरणं प्रपद्ये ॥ 5 ॥

घोषाङ्गनाकरसरोरुहतालनाद -
संगीतसंपदनुरूपमनोज्ञनृत्तौ।
माणिक्यनूपुरमरीचिकृताङ्गलेपौ
गोविन्दराज चरणौ शरणं प्रपद्ये॥ **6** ॥

कुट्टाकतामुपगतौ सरसः प्रसह्य
मध्येसरित्सलिलमुद्धतकालियस्य।
तत्सुन्दरीनयननन्दनसंनिवेशौ
गोविन्दराज चरणौ शरणं प्रपद्ये॥ **7** ॥

वासांसि देहि तव कृष्ण वशंवदाना -
मस्माकमाकुलधियामिति गोपकन्याः।
उद्दिश्य यौ विदधुरञ्जलिमा प्रसादाद्
गोविन्दराज चरणौ शरणं प्रपद्ये॥ **8** ॥

गोरक्षणे किल बभूव यदीयरेणु -
रक्रूरमस्तकमणेः सरणिं समेतः।
तावद्भुतावनुपमावतिपावनौ ते
गोविन्दराज चरणौ शरणं प्रपद्ये॥ **9** ॥

मल्लावहे मधुरया मधुराङ्गनानां
फुल्लारविन्ददलतल्लजलोचनानाम्।
वाण्या प्रशंसितपरार्ध्यगतिप्रकारौ
गोविन्दराज चरणौ शरणं प्रपद्ये॥ **10** ॥

कंसं निपात्य कनकासनतः पृथिव्या -
मुद्धृत्य सागसमनागसमुग्रसेनम्।
राज्येऽभिषिच्य विनिवारितभूमिभारौ
गोविन्दराज चरणौ शरणं प्रपद्ये॥ **11** ॥

दुर्योधने दुरभिमानिनि दुर्भगाणा -
मग्रेसरे भजति ते शिरसः प्रदेशम्।
धन्येन यन्निकटतः स्थितमर्जुनेन
गोविन्दराज चरणौ शरणं प्रपद्ये ॥ **12** ॥

सारथ्यवेषसमलङ्कृतपाण्डुसूनो -
र्युद्धाङ्गणोज्ज्वलरथाञ्चलसंनिवेशौ।
सान्द्रेन्द्रनीलपरिभावुकभव्यरूपौ
गोविन्दराज चरणौ शरणं प्रपद्ये ॥ **13** ॥

भक्त्या प्रसन्नहृदयेन धनंजयेन
यत्रार्चितानि कुसुमानि शिवोत्तमाङ्गे।
साक्षात्कृतानि सहसाद्भुतवैभवौ तौ
गोविन्दराज चरणौ शरणं प्रपद्ये ॥ **14** ॥

अस्मद्गुरुप्रभृतिभिः कमलावसानै -
रादर्शितौ करुणया मम देशिकेन्द्रैः।
सत्त्वोत्तरैः सकलजीवदयापरैस्तै -
र्गोविन्दराज चरणौ शरणं प्रपद्ये ॥ **15** ॥

अस्मात्पितामहमशेषगुणाभिराम -
माचार्यरत्नमयि वादिभयङ्करार्यम्।
गोवर्धनाद्रिधृतिधारितगोप वीक्ष्य
गोविन्दराज मम दुर्लपितं क्षमस्व ॥ **16** ॥

॥ श्री गोविन्दराजप्रपत्तिः समाप्ता ॥